**SET-4**

**Series %BAB%**

प्रश्न-पत्र कोड
Q.P. Code **49**

रोल नं.
Roll No.

परीक्षार्थी प्रश्न-पत्र कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Q.P. Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **8** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए प्रश्न-पत्र कोड को परीक्षार्थी उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **9** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, उत्तर-पुस्तिका में प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **8** printed pages.
- Q.P. Code given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **9** questions.
- **Please write down the serial number of the question in the answer-book before attempting it.**
- 15 minute time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*समयोः : होराद्वयम्* | *पूर्णाङ्काः : 40*
*निर्धारित समय : 2 घण्टे* | *अधिकतम अंक : 40*
*Time allowed : 2 hours* | *Maximum Marks : 40*

***Instructions :***

*(i)* *This question paper contains **three** sections – Unseen passage, Writing skills and Textbook based questions.*

*(ii)* ***Section A** – Unseen passage contains one question part four, parts of questions based on specific instructions given in the question itself.*

*(iii)* ***Section B** – (Writing Skills) consists of three (3) questions. Attempt all 3 questions based on specific instructions given in the question itself.*

*(iv)* ***Section C** – (Textbook based questions) contains 5 main questions. There are 08 optional questions but attempt 14 sub-questions as per the instructions given in the question itself.*

**Section A**

**(अपठितावबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत : *10*

भारतदेशस्य पर्यटनस्थलेषु विश्वप्रसिद्धं दिल्लीनगरम् तु विशेषेण दर्शनीयम् अस्ति । भारतस्य गौरवशाली राजधानी इयम् । अस्या: ऐतिहासिकं, सांस्कृतिकं, धार्मिकम्, आर्थिकम् महत्त्वं तु सर्वैः विदितम् । यमुनाया: तटे स्थितस्य अस्य नगरस्य गणना जगत: आधुनिकतमनगरेषु भवति । अत्र रक्तदुर्गं, भारतद्वारं, कुतुबमीनारम्, अक्षरधाममन्दिरम् इत्यादीनि प्रमुखदर्शनीयानि स्थानानि सन्ति । अधुना तु मैट्रोरेलयानव्यवस्था अस्य नगरस्य शोभां वर्धयति । इदं न तु केवलं व्यापारिककेन्द्ररूपेण प्रसिद्धम् अस्ति, अपितु अत्र सांस्कृतिक-गतिविधय: अपि अतीव रोचका: भवन्ति । दिल्लीविश्वविद्यालय:, जवाहरलालनेहरू विश्वविद्यालय:, जामियामिलियाविश्वविद्यालय:, च विश्वप्रसिद्धा: शिक्षणसंस्था: छात्राणां कृते तु वरदानरूपाः सन्ति ।

दिल्लीनगरे स्थितानि विशालभवनानि, स्मारकाणि, उद्यानानि च अस्य नगरस्य आकर्षणानि सन्ति । प्रतिवर्षम् अनेके पर्यटका: अत्रागत्य मोदम् अनुभवन्ति । इदं महानगरं न केवलम् ऐतिहासिकदृष्ट्या प्रसिद्धं वर्तते अपितु भारतीयसंस्कृते: च गौरवम् अस्ति । एवं हि नगरमिदम् आधुनिकभारतदेशस्य प्रगते: उत्कृष्टतमं रूपमस्ति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्) *2×1=2*

(i) दिल्लीनगरस्य काः रोचकाः सन्ति ?

(ii) के अत्र आगत्य मोदम् अनुभवन्ति ?

(iii) भारतस्य केषु दिल्लीनगरं विशेषेण दर्शनीयम् अस्ति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) *2×2=4*

(i) दिल्लीनगरम् आधुनिकभारतदेशस्य प्रगतेः कीदृशं रूपमस्ति ?

(ii) दिल्लीनगरे प्रमुखानि दर्शनीयानि स्थानानि कानि सन्ति ?

(iii) अधुना दिल्लीनगरस्य शोभां का वर्धयति ?

(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत । *1×1=1*

(ई) यथानिर्देशम् उत्तरत । (केवलं प्रश्नत्रयम्) *3×1=3*

(i) 'संसारस्य' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत ।

(ii) 'विश्वप्रसिद्धाः' इति पदस्य विशेष्यपदं किम् ?

(iii) 'प्राचीनतमम्' इति पदस्य विलोमपदं गद्यांशात् चित्वा लिखत ।

(iv) 'भवन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

## Section B

## (रचनात्मक-कार्यम्)

**2.** (क) भवतां विद्यालये एकस्य अभिनयप्रशिक्षणस्य शिविरस्य आयोजनं भवति । ये इच्छुकाः छात्राः अस्मिन् शिविरे आगन्तुम् वाञ्छन्ति ते यथासमयं पञ्जीकरणं कारयन्तु । एतत् विषयम् अधिकृत्य एकां सूचनां संस्कृतेन लिखत । *1×5=5*

**अथवा**

(ख) 'नेत्रदानम्' इति संकल्पम् आधृत्य एकस्य नेत्रदानशिविरस्य आयोजनं 'युवाकल्याण समित्या' क्रियते । अधिकाधिकाः जनाः अस्मिन् अभियाने स्वयोगदानं यच्छेयुः इति उद्देश्येन एकम् आकर्षकं विज्ञापनं रचयत । *1×5=5*

**3.** प्रदत्ततथ्यानां सहायतया अधोलिखितं विषयम् अधिकृत्य संस्कृतेन अनुच्छेदं लिखत : *1×5=5*

(क) विषय: – संगणकस्य उपयोगिता

विज्ञानस्य युगम् ।

तकनीकज्ञानम् एव अनिवार्यम् ।

आधुनिके युगे संगणकस्य आवश्यकतैव ।

इदमेव सफलताया: मार्गम् ।

**अथवा**

(ख) विषय: – वसुधैव कुटुम्बकम्

परस्परं सद्भावम् अनिवार्यम्

भारतीय संस्कृति: इयमेव

सर्वजनहिताय इदम् अनिवार्यम्

मानवानां शान्ते: प्रगते: च मार्गम्

**4.** निम्नलिखितवाक्येषु केषाञ्चित् ***पञ्च*** वाक्यानां संस्कृतेन अनुवादं कुरूत : *5×1=5*

(i) वह कहीं जा रही है ।
She is going somewhere.

(ii) छात्र श्लोक सुन रहे थे ।
Students were listening to the Shloka.

(iii) क्या अब बच्चे स्कूल जाएँगे ?
Will the children go to school now ?

(iv) हमें सदा सत्य बोलना चाहिए ।
We should always speak the truth.

(v) तुम यहाँ मत देखो ।
You should not look here.

(vi) वे दोनों मधुर गा रही हैं ।
Both of them are singing sweetly.

(vii) कल बारिश हुई ।
It rained yesterday.

## Section C
## (पठितावबोधनम्)

**5.** अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत : *3*

मनुष्याणां हिंसावृत्तिस्तु निरवधिः । पशुहत्या तु तेषाम् आक्रीडनम् । केवलं क्लिक्लान्तचित्तविनोदाय महारण्यम् उपगम्य ते यथेच्छं निर्दयं च पशुघातं कुर्वन्ति । तेषां पशुप्रहार – व्यापारमालोक्य जडानामपि अस्माकं विदीर्यते हृदयम् । निरन्तरम् आत्मोन्नतये चेष्टमानाः लोभाक्रान्त-हृदयाः मनुजन्मानः किल प्रतिक्षणं स्वार्थसाधनाय सर्वात्मना प्रवर्तन्ते । न धर्ममनुधावन्ति, न सत्यमनुबध्नन्ति । परं तृणवद् उपेक्षन्ते स्नेहम् । अहितमिव परित्यजन्ति आर्जवम् । अमङ्गलमिव उपघ्नन्ति विश्वासम् । न स्वल्पमपि बिभ्यति पापाचारेभ्यः, न किञ्चदपि लज्जन्ते मुहुरनृतव्यवहारात् । नहि क्षणमपि विरमन्ति परपीडनात् ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(i) केषां हिंसावृत्तिः तु निरवधिः ?

(ii) लोभाक्रान्त-हृदयाः मनुष्याः कं न अनुबध्नन्ति ?

(iii) अमङ्गलमिव कम् उपघ्नन्ति ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) $2\times1=2$

(i) महारण्यम् उपगम्य मनुष्याः किं कुर्वन्ति ?

(ii) मनुजन्मानः कस्मै सर्वात्मना प्रवर्तन्ते ?

(iii) कीदृशाः मानवाः परपीडनात् क्षणमपि न विरमन्ति ?

**6.** अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत : *3*

ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ।।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(i) प्रीतिलक्षणम् कतिविधम् उक्तम् ?

(ii) 'पृच्छति' इति प्रीतेः कतमः गुणः अस्ति ?

(iii) किम् प्रदानम् अपि प्रीतिलक्षणम् ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) $2\times1=2$

(i) प्रीते: लक्षणानि कानि ? लिखत ।

(ii) प्रीतिलक्षणेषु परस्परं विपरीतार्थक-संयुक्तगुणानि कानि उक्तानि ? लिखत ।

(iii) सुहृद् किम् आख्याति ?

**7.** अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत : 3

*योगाचार्य:* — प्रियच्छात्रा: ! किं भवन्त: जानन्ति यत् योगशास्त्रे शरीरस्य मनस: च नियमनं प्रतिपादितं वर्तते । अस्य ज्ञानेन अभ्यासेन च भवन्त: स्वाध्यायेऽपि एकाग्रतां वर्धयितुम् सक्षमा: भविष्यन्ति ।

*मनीष:* — अस्माभि: समाचारपत्रेषु पठितम् यत् विश्वेऽपि योगदिवस: सोत्साहम् मान्यते ।

*योगाचार्य:* — साधूक्तम् । जूनमासस्य एकविंशतितम: दिवस: तु अन्ताराष्ट्रिययोगदिवसरूपेण सर्वत्र मान्यते ।

*मोहिनी* — आचार्य ! वयं सम्प्रति योगविषये सविस्तरं ज्ञातुम् इच्छाम: ।

(योगाचार्य: पाठमाध्यमेन योगशिक्षां शिक्षयति)

*योगाचार्य:* — प्रियच्छात्रा: ! ध्यानेन शृणुत । योगश्चित्तवृत्तिनिरोध: ।

**प्रश्ना:**

(अ) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्) $2\times\frac{1}{2}=1$

(i) छात्रा: कस्य विषये सविस्तरं ज्ञातुम् इच्छन्ति ?

(ii) छात्रै: कुत्र पठितं यत् योगदिवस: विश्वेऽपि सोत्साहं मान्यते ?

(iii) क: चित्तवृत्तिनिरोध: ?

(आ) पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्) $2\times1=2$

(i) अन्ताराष्ट्रिययोगदिवस: कदा मान्यते ?

(ii) छात्रा: स्वाध्यायेऽपि एकाग्रतां वर्धयितुं कथं सक्षमा: भविष्यन्ति ?

(iii) योगाचार्य: पाठमाध्यमेन छात्रान् किम् शिक्षयति ?

**8.** अधोलिखितभावार्थे रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरूत : *3×1=3*

(क) "क्षणे-क्षणे हयस्य खुराश्चिक्कणपाषाणखण्डेषु प्रस्खलन्ति, पदे-पदे दोधूयमानाः वृक्षशाखाः सम्मुखमाघ्नन्ति, परं दृढसंकल्पः अयं सादी न स्वकार्याद् विरमति ।"

**भावार्थः**

यद्यपि (i) _________ खुराः चिक्कणप्रस्तरेषु अस्थिराः भवन्ति, कम्पमानाः (ii) _________ सम्मुखं प्रहरन्ति, तथापि एषः (iii) _________ दृढतया संकल्पवान् अस्ति, अतः स्वकर्त्तव्यात् विमुखः न भवति ।

**अथवा**

(ख) "तद्यथा भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते ।"

**भावार्थः**

यदि अस्माभिः खादनीयपदार्थविषये कोऽपि (i) _________ क्रियते तदा (ii) _________ एव पालनीयः भवेत्, यतः एतत् कृत्वा अभक्ष्यनिषेधज्ञानं तु स्वतः एव (iii) _________ ।

**मञ्जूषा**

| संशयः, अश्वारोही, जायते, वृक्षशाखाः भक्ष्यनियमः, अश्वस्य |
|---|

**9.** अधोलिखित – अन्वये रिक्तस्थानानि पूरयत : (केवलं पद्यमेकम्) *3×1=3*

(क) उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम् ।
शूरं कृतज्ञं दृढनिश्चयं च लक्ष्मीः स्वयं वाञ्छति वासहेतोः ।।

**अन्वयः**

उत्साहसम्पन्नम् (i)_________ क्रियाविधिज्ञम् (ii)_________ असक्तम् । शूरम् कृतज्ञम् दृढनिश्चयम् च लक्ष्मीः स्वयं (iii) _________ वाञ्छति ।।

**अथवा**

(ख) उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।

तटाकोदरसंस्थानां परीवाह इवाम्भसाम् ।।

**अन्वयः**

उपार्जितानाम् (i)_________ त्यागः एव हि (ii)_________ (भवति) ।
तटाकोदर-संस्थानाम् अम्भसाम् परीवाहः (iii) _________ ।।

**मञ्जूषा**

| |
|---|
| रक्षणम्, इव, व्यसनेषु, वासहेतोः, वित्तानाम्, अदीर्घसूत्रम् |